# श्रीसोमनाथसंस्कृतयुनिवर्सिटी,वेरावलम्
# सत्रान्तपरीक्षा – एप्रिल – २०१९

**कक्षा –** शास्त्रिद्वितीयवर्षम् (SEM-4) **प्रश्नपत्रम् –** ०८ **गुणाः -** ७०

**विषयः** - साहित्यम् **कोड –** C.E. 2.4.8. (Old) **समयः -** ०३ तः ०६

**दिनाङ्कः** - ०८/०४/२०१९ **सन्दर्भग्रन्थः –** वेणीसंहारम् (४ तः ६ अङ्काः)

---

**प्रथमान्वितिः (Unit-1)**

**प्रश्नः – १ निम्नलिखितश्लोकेषु द्वयोः श्लोकयोः ससन्दर्भं व्याख्या कार्या ।** १०

१. युक्तो यथेष्टमुपभोगसुखेषु नैव, त्वं लालितोऽपि हि मया न वृथाऽग्रजेन ।
अस्यास्तु वत्स! तव हेतुरहं विपत्तेर्यत्कारितोऽस्यविनयं न च रक्षितोऽसि ॥

२. प्रत्यक्षं हतबन्धूनामेतत्परिभवाग्निना ।
हृदयं दह्यतेऽत्यर्थं कुतो दुःखं कुतोव्यथा ॥

३. अद्यैवाऽऽवां रणमुपगतौ तातमम्बां च दृष्ट्वा
घ्रातस्ताभ्यां शिरसि विनतोऽहं च दुःशासनश्च ।
तस्मिन्बाले प्रसभमरिणा प्रापिते तामवस्थां
पार्श्वं पित्रोरपगतघृणः किन्नु वक्ष्यामि गत्वा ॥

**प्रश्नः – २** वेणीसंहारनाटकस्य चतुर्थाङ्कस्य कथासारं वर्णयतु । १०

**(अथवा)**

सूत-दुर्योधनयोः मध्ये चर्चां वर्णयत ।

**द्वितीयान्वितिः (Unit-2)**

**प्रश्नः – ३ निम्नलिखितेषु द्वयोः श्लोकयोः सप्रसङ्गं ससन्दर्भं व्याख्यां कुरुत ।** १०

(१) मातः ! किमप्यसदृशं कृपणं वचस्ते, सुक्षत्रिया क्व भवती ? क्व च दिनतैषा ?
निर्वत्सले ! सुतशतस्य विपत्तिमेतां त्वं नाऽनुचिन्तयसि रक्षसि मामयोग्यम् ॥

(२) अप्रियाणि करोत्येष वाचा शक्तो न कर्मणा ।
हतभ्रातृशतो दुःखी प्रलापैरस्य काव्यथा ॥

(३) स्मरति न भवान्पीतं स्तन्यं विभज्य सहाऽमुना,
मम न मदितं क्षौमं बाल्ये त्वदङ्गविवर्तनैः ।
अनुजनिधनस्फीताच्छोकादतिप्रणयाच्च यद्,
विकृतवचने माऽस्मिन् क्रोधश्चिरं क्रियतां त्वया ॥

प्रश्नः – ४ पञ्चमाङ्कस्य कथासारः लेख्यः । १०

(अथवा)

वेणीसंहारनाटकानुसारेण सञ्जयस्य चरित्रचित्रणं कुरुत ।

## तृतीयान्वितिः(Unit - 3)

**प्रश्नः –५ अधोलिखितेषु द्वयोः श्लोकयोः ससन्दर्भं व्याख्यां कुरुत।** १०

१. स कीचकनिषूदनो बकहिडिम्बकिर्मीरहा
मन्दाऽन्धमगधाऽधिपद्विरदसंधिभेदाशनिः।
गदापरिघ्यशोभिना भुजयुगेन तेनान्वितः प्रियस्तव
ममाऽनुजोऽर्जुनगुरुर्गतोऽस्तं किल॥

२. ऊरू करेण परिघट्टयतः सलीलं दुर्योधनस्य पुरतोऽपहृताऽम्बरा या।
दुःशासनस्य करकर्षणभिन्नमौलिः सा द्रौपदी कथयत क्व पुनः प्रदेशे॥

३. कृतगुरुमहदादिक्षोभसम्भूतमूर्तिं गुणिनमुदयनाशस्थानहेतुं प्रजानाम्।
अजममरमचिन्त्यं चिन्तचित्वाऽपि नत्वां, भवति जगति दुःखी किं पुनर्देव दृष्ट्वा॥

प्रश्नः –६ वेणीसंहारनाटकानुसारं भीमसेनस्य चरित्रचित्रणं कुरुत। १०

(अथवा)

षष्ठाङ्कस्य कथासारं लिखतु।

## अन्वितयः १ – ३ (Unit 1 – 3)

**प्रश्नः –७ अधोलिखितेषु प्रश्नेषु दशानां प्रश्नानां लघूत्तरं लिखत।** १०

१) वेणीसंहारनाटकस्य रचयिता कोऽस्ति ?
२) चतुर्थाङ्कस्य प्रारम्भे कः प्रविशति ?
३) चतुर्थे अङ्के कति श्लोकाः सन्ति ?
४) वेणीसंहारनाटके कति पुरुषपात्राणि सन्ति ?
५) कर्णः कोऽस्ति ?
६) वेणीसंहारनाटके कति पात्राणि सन्ति ?
७) वेणीसंहारस्य पञ्चमाङ्के कति श्लोकाः सन्ति ?
८) पञ्चमाङ्के कः प्रविशति ?
९) 'अवैषि' शब्दस्य कोऽर्थः ?
१०) सुन्दरकः को विद्यते ?
११) सूतः कोऽस्ति ?
१२) राधेयः कस्य नाम ?
१३) षष्ठाङ्के कति श्लोकाः सन्ति ?
१४) वेणीसंहारस्य नायिका कीदृशी नायिका वर्तते ?
१५) षष्ठाङ्के केषां प्रवेशः भवति ?

*******************